Begins on fol. 13b of the MS. described under No. 5615, wherein this work has been omitted to be mentioned in the list of other works given therein.

Contains four stanzas in praise of the goddess Dēvī or Pārvatī.

**Beginning :**

विश्वयोनिं महाशक्तिं मारीलक्ष्मीं सनातनीम् ।
मातङ्गीं मदनापूरां वन्दे तां जगदीश्वरीम् ॥

**End :**

मेघस्वर्नीं रौद्रमुखीं मुक्तकेशीं त्रिलोचनाम् ।
भद्रकालीं महाभूतां वन्दे तां जगदीश्वरीम् ॥

---

## No. 14327. हस्तामलकस्तोत्रम्.
## HASTĀMALAKASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 73a of the MS. described under No. 3680.

Wants the beginning ; otherwise complete.
Same work as that described under No. 4779 ante. By Hastāmalaka.
These two additional stanzas are given in the end :

आत्मचैतन्यमाश्रित्य सर्वेन्द्रियमनोधियः ।
स्वकार्यार्थेषु वर्तन्ते आत्मबोधस्वरूपतः ॥
कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।
कार्यकारणतां कृत्वा पूर्णबोधोऽवशिष्यते ॥

**Colophon :**

इति हस्तामलकस्तोत्रं सम्पूर्णम् ॥

---

No. **14328.** एकोद्दिष्टप्रयोगः.
ĖKŌDDIṢṬAPRAYŌGAḤ.

**Page, 1. Lines, 8 on a page.**

Begins on fol. 73*b* of the MS. described under No. 3680, wherein this work was omitted in the list of other works.

Incomplete.

Similar to the work described under No. 3708 ante.

**Beginning :**

आद्यमासिके यदि भोक्ता(न विद्यते) तदन्नं पुरुष . . . भोजनपर्याप्तं सपरिकरमादाय प्रभूतमानीय ग्रामाद्बहिः शुचौ समे देशे लौकिकाग्निमुपसमाधाय प्राणानायम्याद्यमासिकप्रतिनिधिहोमं करिष्ये—इति सङ्कल्प्य।

**End :**

प्रेताय तिलोदकं दत्वा स्रुवेण तूष्णीमेकाहुतिं हुत्वा पुरुषसूक्तं प्रत्यृचं द्विरुक्त्वा हस्तेन समस्तमन्नं जुहोति । एवमाज्येन . . हुत्वा पुनस्तिलोदकं दत्वा स्नात्वा गृहमागत्य शेषं पूर्ववत् कुर्यात् ।

अयं होम आद्यमासिकस्यैव ॥

---

No. **14329.** तिथ्यादिनिर्णयः.
TITHYADINIRṆAYAḤ.

**Pages, 3. Lines, 8 on a page.**

Begins on fol. 73*b* of the MS. described under No. 3680, wherein this work was omitted in the list of other works.

Complete.

Determines what days are considered auspicious or inauspicious for the performance of funeral ceremonies, etc.

**Beginning:**

कालविधाने—

नन्दां भद्रां कलितिथिमिलापुत्रशुक्रार्थवारा-
न्नक्षत्रं च त्रिपदममराचार्यशुक्रेन्दुलग्नम् ।
त्यक्त्वा पापग्रहबलवशाच्छावकार्याणि सर्वा-
ण्याहुस्तत्स . . . . . . . ॥

तथा वसिष्ठः—

नन्दायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु ।
कुर्वतः प्रेतकार्याणि कुलक्षयकराणि च ॥

* * * *

अपि नन्दाजयापूर्णारिक्तासु मरणं यदि ।
दहनं तु तथा चैव तस्य वर्गस्य शोभनम् ॥
मन्देन्दुसोम(सौम्य) सूर्याणां नन्दके दिवसे यदि ।
संस्कारो मरणं तस्य वर्गस्य तु शुभावहः ॥

**End:**

अर्वाक् त्रिपक्षे प्रेतस्य पुनर्दहनकर्मणि ।
न कालनियमो ज्ञेयो न मौढ्यं गुरुशुक्रयोः ॥
सपिण्डनक्रियाकालेष्वौर्ध्वदैहिकमाचरेत् ।
गुरुभार्गवयोर्मौढ्यान्न दोषस्तत्र विद्यते ॥

**Colophon:**

इति तिथ्यादिनिर्णयः ॥

---

No. **14330.** दक्षिणामूर्त्यष्टकम्.

DAKṢIṆĀMURTYAṢṬAKAM.

**Page, 1. Lines, 8 on a page.**

Begins on fol. 76*b* of the MS. described under No. 3680, wherein this work was omitted in the list of other works.

Incomplete.

Same work as that described under R. No. 118(*b*) of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-B, but wants the first stanza.

---

## No. 14331. ब्रह्मयज्ञप्रयोगः.
## BRAHMAYAJÑAPRAYŌGAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 89*b* of the MS. described under No. 3680, wherein this work was omitted in the list of other works.

Complete.

Same work as that described under No. 3740 ante.

---

## No. 14332. नक्षत्रनिघण्टुः.
## NAKṢATRANIGHAṆṬUḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 98*a* of the MS. described under No. 3680, wherein this work was omitted in the list of other works.

Complete.

Same work as that described under No. 13797 ante, but with slightly different readings.

**Beginning:**

अश्वयुक् चाश्विनी दस्रा वाजीहयतुरङ्गमाः ।
भरणी याम्यकालौ च धर्मराजान्तको यमः ॥

**End:**

अजैकपात्रिपाद्रि(ऋक्षः) अहिर्बुध्न्योऽतिपादपत् ।
उपान्त्यं रेवती पौष्णः अन्त्यवं(भं) चेति कथ्यते ॥

---

## No. 14333. नमश्शिवाष्टकम्.
## NAMAŚŚIVĀṢṬAKAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 99*a* of the MS. described under No. 3680, wherein this work was omitted in the list of other works.

Complete.

Same work as that described under No. 11011 ante, but without the last stanza containing the Phalaśruti. By Vasiṣṭha.

No. 14334. श्रौतप्रयोगरत्नम्.

ŚRAUTAPRAYŌGARATNAM.

Pages, 82. Lines, 50 on a page.

Begins on fol. 76a of the MS. described under No. 2636.

Contains the following subjects :—

अग्निष्टोमकारिका.
यज्ञपुच्छकारिका.
अग्नीषोमीयकारिका.
मैत्रावरुणकर्तव्यतानिरूपणकारिका.
सर्वपृष्ठाप्तोर्यामकारिका.
अग्निहोत्रकारिका.
अतिरात्रकारिका.

Deals with the procedure relating to the performance of the different kinds of sacrifices. By Nṛsiṁha, younger brother of Gōpīnātha.

**Beginning:**

आधानादथ पौर्णमासहविषा दार्शेन चेष्ट्वा यजे-
दिष्ट्या चाग्रयणाख्ययाथ पशुना यो वैश्वदेव्यादिभिः ।
सोमेनाथ यजेत पर्व हविषा चेष्ट्वा यजेत . . . . .
. . . . धानविधेरनन्तरममास्ते मुख्यकालाश्रयः ॥
वसन्ते पर्वणि यथा सुत्या स्यादारभे . . था ।
अमावास्यापदं मन्त्रमादौ सूत्रकृदब्रवीत् ।।
शुक्लपक्षे वसन्ते नः सिद्धान्त्याह यजेदिति ।
ऋत्विजः षोडशैतस्य होत्राद्याश्च (समी)रिताः ॥
तेषु होता प्रशास्ताच्छावाको ग्रावस्तुदाह्वयः ।
ब्रह्मा च ब्राह्मणाच्छंसी नेष्टाग्नीत्पोतृसंज्ञकः ॥
एते बह्वृचसूत्रोक्तकर्मकर्तार ईरिताः ।
तत्रादौ होतृकर्मात्र वक्ष्यते च सुविस्तरम् ॥

* * * *

**Colophon:**

गोपीनाथबुधानुजभट्टश्रीमन्नृसिंहचरितेऽस्मिन् ।
श्रौतप्रयोगरत्ने ह्यतिरात्रीयप्रशास्तृकर्मोक्तम् ॥

**End:**

अर्धर्चेनाथ यस्मै त्वं वासोदानाय शिक्षसि ।
अयामन्नग्न इत्येतदर्धर्चे विहरेत्सुधीः ॥

* * *

इत्यर्धर्चमुपोपेत्तु मपवन्नर्धतो बुधः ।

## No. 14335. भागवततात्पर्यनिर्णयः.
## BHĀGAVATATĀTPARYANIRṆAYAḤ.

**Pages, 104. Lines, 12 on a page.**

Begins on fol. 143*a* of the MS. described under No. 2188.

Contains the Skandhas one to nine and the first three Adhyāyas of the tenth Skandha.

Same work as that described under No. 4823 ante. By Ānandatīrtha.

---

## No. 14336. आश्वलायनपूर्वप्रयोगः.
## ĀŚVALĀYANAPŪRVAPRAYŌGAḤ.

**Pages, 13. Lines, 6 on a page.**

Begins on fol. 90*a* of the MS. described under No. 1160, wherein this was omitted to be included in the list of other works.

Contains the Jātakarma and Nāmakaraṇa only.

Slightly different from the work described under No. 3566 ante.

**Beginning:**

जाते कुमारे पिता सचेलं स्नात्वा नाभिच्छेदनात्पूर्वं देवर्षिपितृप्रीत्यर्थं यथाशक्ति गोभूहिरण्यादिकं दत्वा . . . . . लग्नं परीक्ष्य कृतप्राणायामो देशकालावनुकीर्त्यास्य कुमारस्यायुर्वर्चोबलपुष्ट्यादिसिद्ध्यर्थं जातकर्माख्यं(कर्म) करिष्ये—इति सङ्कल्प्य एकस्मिन्पात्रे मधुसर्पिषी निक्षिप्य हिरण्येनोपमृष्य हिरण्येन किञ्चित् किञ्चिद् गृहीत्वा प्र ते ददामि मधुनो घृतस्य

* * * *

कुमारं प्राशयेत् ।

**End:**

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महादेव्यै(वेद्यै) नमो नमः ॥
प्रमादात्कुर्वतां कर्म प्रच्यवत्यध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रु(स्मृ)तिः ॥
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

---

## No. 14337. ब्रह्मयज्ञप्रयोगः.
## BRAHMAYAJÑAPRAYŌGAḤ.

**Pages, 9. Lines, 6 on a page.**

Begins on fol. 97*a* of the MS. described under No. 1106.

Incomplete.

Slightly different from the work described under No. 2846 ante. This is intended for the Mādhvas.

**Beginning:**

श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थं देवर्षिपितृतुष्ट्यर्थं ब्रह्मयज्ञेन यक्ष्ये । ब्रह्मयज्ञपूर्वभागि(वि)नीं गायत्रीं सावित्रीं सव्याहृतिमेको . . . . . . . . . पच्छोऽर्धर्चशः करिष्ये—ओं भूः तत्सवितुर्वरेण्यम् ।

**End:**

ये चान्ये आचार्यास्ते सर्वे तृप्यन्तु तृप्यन्तु ॥ विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि वि ममे रजांसि ।

* * * *

भूरेरवावतः पुरुश्चन्द्रयोरापः.

---

## No. 14338. पूर्वप्रयोगः.
## PŪRVAPRAYŌGAḤ.

**Pages, 28. Lines, 6 on a page.**

Begins on fol. 101*a* of the MS. described under No. 1160.

Incomplete.

Similar to the work described under No. 8696 ante. The procedure laid down here is intended for the followers of Ānandatīrtha or Mādhvas.

**Beginning:**

स्वस्तिवाचनम्—

शुक्लाम्बरधरं विष्णुम् × शान्तये ॥
लक्ष्मीनारायण . . . . . तद्भक्तप्रवरो हि यः ।
श्रीमदानन्दतीर्थाख्यो गुरुस्तं च नमाम्यहम् ॥
सर्वविघ्नप्रशमनं सर्वसिद्धिकरं परम् ।
सर्वजीवप्रणेतारं वन्दे विजयदं हरिम् ॥

* * * *

प्राणानायम्य सङ्कल्प्य श्रीलक्ष्मीनारायणप्रीत्यर्थं यजमानकुमारस्य चौलोपनयनलग्नकाले आदित्यादीनां नवानां ग्रहाणां ये ये ग्रहाः शुभस्थानेषु स्थिताः

* * * *

शुभस्थानफलावाप्त्यर्थमद्य स्वस्तिवाचनाख्यं कर्म करिष्यमाणः नान्दीआह्वानाख्यं कर्म करिष्यमाणः नवग्रहमखं करिष्यमाणः पुनस्सन्धानाख्यं

करिष्यमाणः जातकर्मनामकरणान्नप्राशनचौलोपनयनाख्यं करिष्यमाणस्तदादौ शुध्यर्थं वृध्यर्थमभ्युदयार्थं च ब्राह्मणैस्सह स्वस्तिपुण्याहवाचनं करिष्ये ।

**End:**

यमाय जुहु(हु)ता हविः । यमं हि(ह) यज्ञे(ज्ञो) गच्छत्यग्निदू(दू)तोऽरङ्कृतिः- (तः) स्वाहा—शनैश्चरप्रत्यधिदेवतायै यमायेदम्.

---

No. 14339. प्रयोगरत्नम्.

PRAYŌGARATNAM.

**Pages, 128. Lines, 6 on a page.**

Begins on fol. 1*a* of the MS. described under No. 3273.

Contains up to the Sthālīpākaprayōga.

Same work as that described under No. 43 on pages 19 and 125 of M. Seshagiri Sastri's Report No. 1.

---

No. **14340.** ग्रहणजननादिशान्तिः.

GRAHAṆAJANANĀDIŚĀNTIḤ.

**Page, 1.** Lines, 6 on a page.

Begins on fol. 72*b* of the MS. described under No. 3273.

Incomplete.

Same work as that described under No. 3297 ante, but slightly different.

**Beginning** and **End:**

ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्जायते नृणाम् ।
सङ्क्रमे च तथा नृ(स्त्री)णामादौ च ऋतुदर्शनम् ॥
इत्थं सञ्जायते यस्य तस्य मृत्युर्न संशयः ।
व्याधिपीडा च दारिद्र्यं शोकं च कलहो भवेत् ॥
शान्तिं तेषां प्रवक्ष्यामि नराणां हितकाम्यया ।
यस्मिन्नृक्षे विशेषेण ग्रहणं यदि जायते ? ॥

---

No. **14341.** वृषोत्सर्जनप्रयोगः.

VṚṢŌTSARJANAPRAYŌGAḤ.

**Pages, 4. Lines, 6 on a page.**

Begins on fol. 73*a* of the MS. described under No. 3273.

Complete.

Similar to the work described under No. 3074 ante. This is intended for the Mādhava community following the Āśvalāyana Sūtra.

**Beginning :**

पुण्याहं वाचयित्वा वृषोत्सर्जनं करिष्ये । आपो हि ष्ठेति सिन्धुद्वीप आपो गायत्रीत्यृचेन कया नो वामदेव इन्द्रो गायत्रीति ऋचाभिषिच्य स्थण्डिलोल्लेखनाद्यग्निप्रतिष्ठापनान्ते रुद्रं सोममिंद्(न्द्रं) प्रधानदेवता श्चरुपायस-यावकद्रव्यैश्चरुशेषेण स्विष्टकृतमित्यादि स्थालीत्रयमासादयेत् ।

* * *

इन्द्रो गायत्रीति त्रिभिर्हुत्वा वृषभमलङ्कृत्य एतं युवानं परि वो ददामि तेन क्रीडन्तीश्चरति (त)प्रियेण । मानश्शास्त जनुषा सुभागा रायस्पोषेण समिषा मदेम । शान्ता पृथिवी—विश्वतः परिपान्तु । सर्वतो व्रजस्वेति-मन्त्रावृत्त्या त्रिभिरग्निं परिणयेत् । वृषभं शूलाङ्कितं कृत्वा पश्चादग्नेः प्राङ्मुखं कृत्वा स्वयं प्राङ्मुखः ।

**End :**

तत्रस्थगवामधिपतिर्भूत्वा समस्तपित्रन्तर्यामिजनार्दनप्रीत्यर्थं यथेच्छं विहर । इमा रुद्रायेति

* * * *

ततः स्विष्टकृतं जुहुयात् । तिलानुदकुम्भवासोहिरण्यानि दद्यात् ॥

---

## No. 14342. प्रश्नोपनिषद्.
## PRAŚNŌPANIṢAD.

**Pages, 8. Lines, 6 on a page.**

Begins on fol. 157*a* of the MS. described under No. 2485.

Incomplete.

Same work as that described under No. 610 ante.

---

## No. 14343. गरुडपुराणम्.
## GARUḌAPURĀṆAM.

**Pages, 4. Lines, 7 on a page.**

Begins on fol. 154*a* of the MS. described under No. 2111.

Contains a small portion of the 12th Adhyāya in the Brahmakāṇḍa which forms the third Aṁśa.

Same work as that described under No. 2108 ante.

**Beginning :**

सर्वेषामुत्तमो ज्ञेयः कलिरेव न संशयः ।
दूषणे विष्णुभक्तानां कलिरेव न संशयः ॥
संसारेऽप्यन्यतमसि सर्वदा हरिदूषकः ।

मिथ्याज्ञाने ज्ञानबुद्धिः दुःखे च सुखबुद्धिमान् ॥
तस्मात् कलिसमो लोके शिवभक्तो न कुत्रचित् ।
दुर्योधनस्स एकोऽपि दुःखानन्त्यस्वरूपवान् ॥
तस्माच्छतगुणांशोना कलिभार्या तु सर्वदा ।
अलक्ष्मीरिति विख्याता मन्थरानामिका भुवि ॥

**End:**

त्वयि मेऽच्छिन्नभक्ताय दयां कुरु महाप्रभो ।
इति स्तुत्वा हरिं ब्रह्मा स्थितः प्राञ्जलिरग्रतः ॥

**Colophon:**

इति श्रीगरुडपुराणे तृतीयांशे (ब्रह्मकाण्डे) कृष्णगरुडसंवादे ब्रह्मस्तुतिर्नाम दशमो(द्वादशो)ऽध्यायः ॥

---

No. 14331. प्रेतसंस्कारविधिः (कारिका).

PRETASAMSKĀRAVIDHIḤ (KĀRIKĀ).

Pages, 9. Lines, 7 on a page.

Begins on fol. 45*a* of the MS. described under No. 2696.

A treatise explaining with authoritative quotations the procedure for the performance of funeral ceremonies.

**Beginning:**

प्रथमेऽहनि कर्तव्यं पित्रोर्वपनमात्मजैः ।
दशमेऽहनि कर्तव्यं सूतके ज्ञातिबान्धवैः ॥

स्मृतिसङ्ग्रहे—

भार्यापुत्रकनिष्ठानां शिष्याणामपि सर्वथा ।
संस्कर्तुर्वपनं नैव यदि कुर्याद्विनश्यति ॥

वृद्धगौतमः—

ज्येष्ठस्य चानपत्यस्य मातुलस्या(सुत)स्य च ।
गर्भवानपि संस्कुर्यात् केशानपि च वापयेत् ॥

व्यासः—

यस्य केशाश्शिरोजाता दशमेऽहन्यवापिताः ।
सूतकं तत्र(स्य) केशेषु लीयते नात्र संशयः ॥

वसिष्ठः—

पुरस्ताद्दहनान्ते वा कर्तुर्वपनमुच्यते ।
दशमेऽह्नि पुनः कुर्यात्कनिष्ठैर्ज्ञातिभिस्सह ॥

**End:**

मध्यमं पिण्डमश्नीयात् यदि पुत्रार्थिनी भवेत् ।
आयुष्मन्तं सुतं विन्द्याद्यशोमेधासमन्वितम् ॥
अक्षता गर्भिणी वन्ध्या गतरक्ता रजस्वला ।
नाश्नीयान्मध्यमं पिण्डं विशेषाद्व्यभिचारिणी ॥
पुत्रे जाते तु षण्मासं पुत्रिका चेद्दतुद्वयम् ।
न देयं रजसः पूर्वं न देयं रजसः परम् ॥

---

No. **14345.** दायविभागवचनानि.
DĀYAVIBHĀGAVACANĀNI.

**Pages, 6.** Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 123*a* of the MS. described under No. 2696.

Incomplete.

Deals with the division of the ancestral property, by one's lineal descendants.

**Beginning:**

वरदराजीये पौत्रस्य पुत्रेण समं विभागमाह याज्ञवल्क्यः—

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ।
तत्र स्यात्सदृशं स्थाप्यं पितुः पुत्रस्य चोभयोः ॥

बृहस्पतिः—

गृहं क्षेत्रमृणं लेख्यं यस्य पैतामहं भवेत् ।
चिरकालं प्रापितोऽपि तस्य भागहरस्तु सः ॥

पैतामहे धने पितुः पुत्रस्य समानस्थिति । यदि पुनरेकस्य बहवः पुत्राः ते विषमान्पुत्रानुत्पाद्य स्थिता मृता वा तत्रेत्थं दायविभागमाह ।

**End:**

कात्यायनोऽपि चतुर्थात्परतो दायविभागनिवृत्तिमाह—रिक्थं प्रतिपादनं तु दत्वाशेषं विभाजयेत् ।

आ चतुर्थात्तसाम्राज्यं क्रमेणैव तु तत्सुतः ॥

प्रतिपादनशब्देन ऋणमुच्यते । पूर्वोक्तं चतुर्थं तु

* * * *

काले देयं त.

## No. 14346. ऋक्संहिता.
## ṚKSAṀHITĀ.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 382. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains the Aṣṭakas 3, 1 and 2, the last being incomplete.

Same work as that described under No. 1 ante.

---

## No. 14347. भूगोलम्.
## BHŪGŌLAM.

Substance, palm-leaf. Size, 6⅝ × 1¼ inches. Pages, 7. Lines, 6 on a page Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Jyautiṣagrantha 4*a*, Praśnacintāmaṇi (Telugu) 17*a*.

Complete.

Similar to the work described under No. 13464 *ante*.

**Beginning:**

वागीशाद्या: + गजाननम् ॥

बालार्ककोटिसङ्काशं बालचन्द्रकलाधरम् ।
ब्रह्मादिसुरसंसेव्यं तं नमामि गजाननम् ॥

एतच्छास्त्रं महाविष्णुर्ददौ स कृपया विधेः ।
लोकानां दीपवच्छास्त्रं प्रत्यक्षं पुण्यवर्धनम् ॥

चतुर्मुखः कश्यपाय कश्यपो भास्कराय च ।
भास्करोऽथ वसिष्ठाय तन्मूलाय प्रकाशितम् ॥

* * * *

स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञिकम् ।
द्वितीयं जातकस्कन्धं तृतीयं संहिताह्वयम् ॥

अथ मेरुप्रशंसा कथ्यते भूलोकस्य च विस्तारः पञ्चाशत्कोटियोजनः ।
जम्बूद्वीपं च (पस्य) विस्तारं लक्षयोजनसंज्ञिकम् ।
जम्बूद्वीपं च यत्प्रोक्तं महामेरुप्रसंस्थितम् ? ॥

**End:**

एते मध्यममेदेन ज्योतिश्शास्त्रप्रमाणतः ।
मृच्छिलाशिखिवाय्वमयः भूगोलस्सर्वतोमुखः ॥

## No. 14348. ज्यौतिषग्रन्थः. JYAUTIṢAGRANTHAḤ.

Pages, 25. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 14347.

Incomplete.

Deals with certain minor matters bearing on astrology.

**Beginning:**

अथ वेदाङ्गत्वमस्य—

छन्दः पादौ शब्दशास्त्रं च वक्त्रं कल्पः पाणिर्ज्यौतिषं चक्षुषीति (च)।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं वेदस्याङ्गान्याहुरेतानि षट् च ॥

* * * *

चैत्रादावुषसि स्मरन्मुररिपुं चोत्थाय चन्द्रस्वरं
वृद्धाशीरनुगृह्य निम्बकदलं प्राश्याज्यपात्रे सुखम् ।
वक्त्रं वीक्ष्य च दर्पणेन मनसा दैवज्ञमन्त्रिप्रजाः
स्वां भार्यां स्वगृहं प्रविश्य च सुखीभूयात्क्रमाद्भूपतिः ॥
अब्दादौ मित्रसंयुक्तो मङ्गलस्नानमाचरेत् ।
वस्त्रैर्वाभरणैर्देहमलङ्कृत्य ततः शुचिः ॥
यथाविभवसारेण भोजयेदिष्टबान्धवान् ।
वाणीं विनायकं खेटान् दैवज्ञं ब्राह्मणं गुरून् ॥
सम्पूज्य वत्सरफलं साङ्गोपाङ्गं यथोचितम् ।

अथ पञ्चाङ्गप्रशंसा कथ्यते—अस्य समस्तकल्याणभाजनस्य श्रौतस्मार्तनित्यनैमित्तिककर्मानुष्ठानहेतुभूतात्मकस्य व्यावहारिकचान्द्रमानस्य साधारणसंवत्सरस्य श्रीसूर्यसिद्धान्तोक्तप्रकारेण श्रीमदादिनारायणस्य श्रीमन्नाभीकमलोद्भवस्य ब्रह्मणः परमायुःप्रमाणनिरूपणम् ।

**End:**

सप्तवर्षाष्टवर्षाश्च प्रसूयन्ते तथा स्त्रियः ।
गोमूत्रं सर्वशो नद्यो भविष्यन्ति कलौ युगे ॥

* * * *

दाता दरिद्रः कृपणो धनाढ्यः पापी चिरायुः संस्कृती गतायुः ।
कुलीनसेव्यो ह्यकुलीनराजा कलौ युगे षड्गुणमाश्रयन्ते ॥

No. **14349.** रघुवंशः.
RAGHUVAMŚAḤ.

**Pages, 3. Lines, 6 on a page.**

Begins on fol. 143*a* of the MS. described under No. 1343.

Contains the fourth Sarga incomplete.

Same work as that described under No. 11636 ante. By Kālidāsa.

No. **14350.** सिद्धान्तकौमुदी.
SIDDHĀNTAKAUMUDĪ.

**Pages, 6. Lines, 6 on a page.**

Begins on fol. 145*a* of the MS. described under No. 1343.

Contains a small portion in Samāsāśrayavidhi.

Same work as that described under No. 1354 ante. By Bhaṭṭōji-dīkṣita.

No. **14351.** ऋग्वेदसन्ध्यावन्दनक्रमः.
ṚGVĒDASANDHYĀVANDANAKRAMAḤ.

**Pages, 12. Lines, 5 on a page.**

Begins on fol. 14*a* of the MS. described under No. 228.

Contains the Prātassandhyāvandana only.

Similar to the work described under No. 2874 ante. This is intended for the Mādhva community.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थं प्रातस्सन्ध्यामुपासिष्ये । आपो हि ष्ठेति तृचस्य सूक्तस्य सिन्धुद्वीप ऋषिः, आपो देवता, गायत्री छन्दः, मार्जने विनियोगः । आपो हि ष्ठा मयोभुवः । ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥

**End:**

मन्त्रहीनं क्रियाहीनं भक्तिहीनं रमापते ।
यत्कृतं तु मया देव परिपूर्णं तदस्तु मे ॥

अनेन प्रातस्सन्ध्यावन्दनेन भगवान् श्रीमद्भारतीरमणमुख्यप्राणान्तर्गत-श्रीलक्ष्मीवेङ्कटेशः प्रीयताम्.

No. **14352.** कृष्णजयन्तीव्रतार्घ्यश्लोकाः.
KṚṢṆAJAYANTĪVRATĀRGHYAŚLŌKĀḤ.

**Page, 1. Lines, 5 on a page.**

Begins on fol. 20*b* of the MS. described under No. 228.

Complete.

Same work as that described under Nos. 8276 and 8277 ante.

---

No. 14353. नारायणोपनिषद्.

NĀRĀYANŌPANIṢAD.

Pages, 4. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 228.

Complete.

Same work as that described under No. 561 ante.

---

No. 14354. गजेन्द्रमोक्षणम्.

GAJĒNDRAMŌKṢAṆAM.

Pages, 26. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 228.

Complete.

Same work as that described under No. 2400 ante.

---

No. 14355. धर्मप्रवृत्तिः.

DHARMAPRAVṚTTIḤ.

Pages, 44. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 228 and not on fol. 40*a* as stated therein.

Incomplete.

Slightly different from the work described under No. 2758 ante.

Contains the following Prakaraṇas :—

१. मौनविधिः.
२. मूत्रपुरीषोत्सर्जनम्.
३. दन्तधावनविधिः.
४. वस्त्रविधिः.
५. स्नानविधिः.
६. आचमनविधिः.
७. द्रव्यशुद्धिः.
८. पवित्रविधिः.
९. गोपीचन्दनविधिः.
१०. भस्मधारणविधिः.
११. शङ्खचक्रादिधारणनिषेधः.

**Beginning:**

नारायणं नमस्कृत्य कामदां च सरस्वतीम् ।
गणनाथं गुरुं चापि धर्मसंरक्षणाय वै ॥

शौचादिकान् प्रवक्ष्यामि क्रियाश्चा(नुक्रमेण)तु ।
तिथीनामपि सर्वासां निर्णया(या)प्यसंशयात् ॥

योगीश्वरः—

यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्मान् निबोधत ।
धर्मसंरक्षणार्थाय(तस्मिन्) देशे वसेद्द्विजः ॥

उषःकाले समुत्थाय चिन्तयेदात्मनो हितम् ।
स्मृत्वा नारायणं देवं स्तोत्राण्यपि च संजपेत् ॥

अथ मौनम्—

प्रभाते मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च मौनं षट्सु विधीयते ॥

दशहस्तं परित्यज्य मूत्रं कुर्याज्जलाशये ।
शतहस्तं पुरीषे तु नदीतीरे चतुर्गुणम् ॥

**End:**

यतीनां ज्ञानदं प्रोक्तं वनस्थानां विरक्तिदम् ।
गृहस्थाश्रमयुक्तानां धर्मवृद्धिकरं तथा ॥

(ब्रह्मचर्या)श्रमस्थानां स्वाध्यायप्रदमेव च ।
शूद्राणां पुण्यदं प्रोक्तमन्येषां पापनाशनम् ॥

इति भस्मधारणविधिः ॥

* * * *

शङ्खं चक्रं च शृङ्गं च यो मूढो धारयेत्तनौ ।
पाषण्डस्स हि विज्ञेयस्सर्वकर्मबहिष्कृतः ॥

इति चक्रशृङ्गादि(धारणनिषेधविधिः) ॥

---

No. 14356. आपस्तम्बापरप्रयोगः.

ĀPASTAMBĀPARAPRAYŌGAḤ.

**Pages, 80. Lines, 5 on a page.**

**Begins on fol. 59*a* of the MS. described under No. 228 and not on fol. 57*a* as stated therein.**

**Complete.**

**Similar to the work described under No. 3519 ante,**

**Beginning:**

अनाहिताग्नेर्मरणे संस्कारविधिरुच्यते । मरिष्यमाणपुरुषं दृष्ट्वा शुद्धदेशे गोमयेनोपलिप्य कुशानास्तीर्य तत्रायं क्रमः—कर्ता प्राणानायम्य यजमानस्य पितुः गोत्रस्य शर्मणः सुखेन प्राणोत्क्रमणसिद्धिद्वारा श्रीविष्णुलोकावाप्त्यर्थं-मुत्क्रान्तिसंज्ञिकगोदानं करिष्ये ।

**End:**

इदमामं सोपस्करं सदक्षिणाकं सताम्बूलं सवस्त्रकं वृद्धप्रपितामहप्रीतिं कामयमानस्तुभ्यमहं संप्रददे न मम . . . . . पिण्डवर्जं . . . . . . विसृज्य स्नात्वा . . . . . . . . . नूतनयज्ञोपवीतधारणं पुण्याहं कुर्यात् । सर्वैर्बान्धवैः ज्ञातिभिस्सह भुञ्जीया(त) ॥

इति सपिण्डीकरणविधिः ॥

---

No. **14357.** भर्तृसापिण्ड्यप्रयोगः.

BHARTṚSĀPIṆḌYAPRAYŌGAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 100*b* of the MS. described under No. 228.

Complete.

On the details of procedure for the performance of the Sapiṇḍīkaraṇa ceremony of a widow so that her Piṇḍa (the rice-offering intended for her) may be merged in her husband's Piṇḍa. This is intended for the Mādhva community.

**Beginning:**

कर्ता प्राणानायम्य तिथ्यादि सङ्कीर्त्य प्राचीनावीती प्रेतान्तर्यामिप्राज्ञ-प्रीत्यर्थं प्रेतायाः गोत्रायाः मरणदिनादारभ्य द्वादशेऽहनि प्रेतत्वाविमुक्तिद्वारा वस्वादिपुण्यलोकावाप्त्यर्थं भर्तृसापिण्ड्याख्यश्राद्धं कर्म करिष्यमाण आदौ आत्मशुध्यर्थं प्रायश्चित्तसूक्तमन्त्रपठनं करिष्ये । सहस्रशीर्षा पुरुषः ।

**End:**

प्राणानायम्य देशकालौ सङ्कीर्त्य स्त्रीपिण्डयुक्तभर्तृपिण्डं तत्पित्रादिषु योजयितुं त्रिधा विभजनं करिष्ये इति सङ्कल्प्य दर्भैः तत्पिण्डं त्रेधा कृत्वा तत्प्रथमशकले मधुवाता इति मधु निनीयादाय ये समानास्समनसः । पितरो यमराज्ये । तेषां लोकः स्वधा नमः यज्ञो देवेषु कल्पताम् । ये समानास्स-मनसः जीवा जीवेषु मामकाः । तेषां . . . कल्पतामस्मिन् लोके शतं समाः ।

सङ्गच्छध्वम्—सत । समानवि —सति । तङ्गनः —वसुरूप । तत्पित्रा वसुरूपेण सहैष ते पिण्डभाग इत्यादि ॥

---

No. 14358. सूतिकारजस्वलागर्भिणीमृतिप्रायश्चित्तविधिः.

SŪTIKĀRAJASVALĀGARBHIṆĪMṚTIPRĀYAŚCITTA-VIDHIḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 105*a* of the MS. described under No. 228.

Complete.

On the expiatory ceremonies to be performed when a woman dies within the first ten days after delivery, or when she is pregnant or when she is under pollution during the monthly course.

**Beginning:**

सूतिकायां मृतायां तु सुतिकामृतिप्रायश्चित्तं करिष्य इति सङ्कल्प्य प्रथमं शुद्धजलेन तूर्ष्णीं स्नापयित्वा धौतवासः परिधाय . . . . . . . मां पुनीहि विश्वत इत्यनेन सूक्तेनार्चितचतुःकलशोदकैः ब्राह्मणः स्नापयित्वा धौतवस्त्रमाच्छाद्य ऋत्विग्भ्यो दक्षिणां दत्वा प्रायश्चित्तार्थं कृच्छ्रत्रयं कुर्यात् ततः पैतृमेधिककर्माधिकारो भवति । रजस्वला मृताप्येवम् ।

**End:**

ततः छिन्नमुदरं सूत्रेण सङ्गृध्य घृतेनानुलिप्य उदरच्छेदनप्रायश्चित्तार्थं वेदपारायणं कुर्युः । कुटुम्बिने ब्राह्मणाय तिलान् भूमिं हिरण्यानि दद्यात् । सुवर्णहस्तादिति कर्म प्रतिपद्यते ॥

**Colophon:**

इति गर्भिणीमरणप्रायश्चित्तं समाप्तम् ॥

---

No. 14359. मृत्तिकास्नानविधिः.

MṚTTIKĀSNĀNAVIDHIḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 109*r* of the MS. described under No. 228, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the work described under No. 3757 ante; as laid down by Śaunaka.

**Beginning:**

अथातो मृत्तिकास्नानविधिं व्याख्यास्यामः—नदीतटाकेषु शुचिप्रदेशे मृत्तिकामुद्धरेत् । बलित्था पर्वतानामित्यभिमन्त्र्य-बलित्था पर्वतानां खिद्रं बिभर्षि पृथिवि । प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि । मा वो रिषत्खनितेति खनित्वा—मा वो रिषत्खनिता यस्मै चाहं खनामि वः । द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् । स्योना पृथिवीति मृत्तिकां गृहीत्वा—स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छानश्शर्म सप्रथाः । आयने ते इति दूर्वां गृहीत्वा.

**End:**

स्नात्वाचम्य देवर्षिपितृनुद्दिश्य स्नानाङ्गतर्पणं कृत्वाचम्य यन्मया दुष्कृतं त्रोयं शरीरमलसम्भवात् । तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहमिति यक्ष्माणं सन्तर्प्य ये के चास्मत्कुले जाता—वस्त्रनिष्पीडनोदकम्-इति वस्त्रं निपीड्याचम्य नमश्शौनकाय नमश्शौनकाय नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥

**Colophon:**

इति शौनकीयमृत्तिकास्नानविधिः ॥

---

No. **14360.** अनाहिताग्न्यन्त्येष्टिप्रयोगः.

ANĀHITĀGNYANTYĒṢṬIPRAYŌGAḤ.

Pages, 112. Lines, 5 on a page.

Begins on fol. 117*a* of the MS. described under No. 228, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

Similar to the work described under No. 3519 ante. This is according to the Āśvalāyana-Sūtra.

**Beginning:**

अथेदानीमनाहिताग्निमधिकृत्यान्त्येष्टिप्रयोगोऽभिधीयते । आसन्नमरणे पित्रादिके पुत्रादयः स्नात्वा मरणकाले शुद्ध्यर्थमुक्तप्रकारेण प्रायश्चित्तं कुर्युः । सङ्कल्पमात्रं कृत्वा सूतकान्ते कुर्युः । अथ शुद्धदेशं गोमयेनोपलिप्य तिलान्विकीर्य दर्भानास्तीर्य तत्र महामुमूर्षुं दक्षिणशिरसं शाययित्वा गङ्गोदकं स्नापयित्वा गोपीचन्दनादीन् धारयित्वोत्क्रान्तिगोदानं कुर्यात् ।

* * * *

**Colophon :**

इत्यनाहिताग्न्यन्त्येष्टिप्रयोगे प्रथमदिनकृत्यं निरूपितम् ॥

**End :**

पूर्वोक्तैवङ्गुणेत्यादि पितुर्गोत्रस्य शर्मणो वसुरूपस्य प्रेतलोकात् पितृलोकगमनसिद्ध्यर्थं पित्रादीनां शर्मणां वसुरुद्रादित्यरूपाणां पाथेयश्राद्धमामेनाद्य करिष्ये—इति सङ्कल्प्य सर्वं पार्वणवत्कुर्यात् । द्वितीयपक्षाश्रयणे तु वृद्धप्रपितामहस्य स्वर्गलोकगमनार्थं तस्यैव नवश्राद्धमेकोद्दिष्टविधानेन कुर्यात् ।

अन्यत्सर्वं समानम् ॥

**Colophon :**

इत्यनाहिताग्न्यन्त्येष्टिप्रयोगे पाथेयश्राद्धप्रयोगस्समाप्तः ॥

---

No. **14361.** ताम्बूलचर्वणविधिः.

TĀMBŪLACARVAṆAVIDHIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 172*a* of the MS. described under No. 228.

Incomplete.

Explains when the betel leaves and nuts are prohibited from being used, when they may be taken with advantage together with the relative quantity of them to be taken in the morning, noon and in the night.

**Beginning :**

सुपूगं च सुपत्रं च चूर्णेन च समन्वितम् ।
दत्वा तु द्विजदेवेभ्यः ताम्बूलं भक्षयेन्नरः ॥ इति

स्मृत्यर्थसारेऽपि—

ताम्बूलचर्वणं कुर्यात् भुक्त्वा रात्रौ च सर्वदा ।
अभ्यङ्गे चैव माङ्गल्ये दिवा वाप्यथ वा निशि ॥

कालभेदेन फलाद्याधिक्यम्—

प्रातःकाले फलाधिक्यं चूर्णाधिक्यं तु मध्यतः ।
पर्णाधिक्यं भवेद्रात्रौ लक्ष्मीवान् स नरो भवेत् ॥ इति ।

पूगनियमेन फल . . . . . . . . माह मार्कण्डेयः—

एकपूगं सुखारोग्यं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च अधिकं चैव दुष्यति ॥

**End :**

मृतौ चैव . . श्राद्धे मातापित्रोर्मृतेऽहनि ।
उपवासे च ताम्बूलं दिवारात्रं विवर्जयेत् ॥

पक्षश्राद्धे तथा दर्शे युगमन्वन्तरादिषु ।
श्राद्धं निर्वर्त्य भुक्त्वा तु ताम्बूलं खादयेन्नरः ॥
मोहादकृत्वा यः श्राद्धं ताम्बूलं यदि खादयेत् ।
श्राद्धहन्ता भवेत्.

No. **14362.** अग्निहोत्रप्रयोगः.

AGNIHŌTRAPRAYŌGAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 198*a* of the MS. described under No. 15.

Incomplete.

Slightly different from the work described under No. 1097 ante.

**Beginning :**

धृष्टिः मम यजमानस्य ममोपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातरग्निहोत्रहोमं तण्डुलैर्होष्यामि । धृष्टिरसि ब्रह्म यच्छ । उपवेषमादाय सुगार्हपत्यो विदहन्नरातीरुषसः श्रेयसीर्दधातु । अग्ने सपत्नाꣳ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहि । गार्हपत्यमभिमन्त्र्य ।

**End :**

उदङ्मुखः प्रत्यङ्मुखो वा सायमायतनेऽग्निं प्रतिष्ठापयति । प्राङ्मुखः प्रातः ॥

इति प्रणयनं समाप्तम् ॥

इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् । समूढमस्य पांसुरे । ओं भूर्भुवस्स्वः समिधः प्रोक्ष्य

* * * *

तदस्तु तुभ्यमिद्धृतं तज्जुषस्व यविष्ठ्य । गार्हपत्यमुपसमिन्धे.

No. **14363.** वासवदत्तास्थपदनिर्वचनम्.

VĀSAVADATTĀSTHAPADANIRVACANAM.

Pages, 5. Lines, 9 on a page.

Begins on fol. 26*a* of the MS. described under No. 12104.

Incomplete

Gives the meaning of the words occurring in the Vāsavadattā of Subandhu with extracts of synonymous expressions from various lexicons.

**Beginning :**

विषयालाभदुःखित्वं चेतसो विकृतिः स्मृतमिति वै (जयन्ती) । भङ्गुरो हृदयार्तिकृदिति वै(जयन्ती) । शृङ्गारो रतिपाषाणाविति वै (जयन्ती) । लक्षं व्याजे शरव्ये च धने च बहुसङ्ख्यके इति वै (जयन्ती) ।

* * * *

माधमा कर्कटी प्रोक्ता तत्सुता सेगवा (स्मृता) इति हलायुधः । अरं शीघ्रे कालकूटे शिलापुष्पे च कथ्यते। कुहूमुखं तु दर्शादौ कोकिलोत्पातयोरिति भागुरिः।

**End:**

पश्यतो यो हरत्यर्थं स चोरः पश्यतोहरः । इति ह(लायुधः) ।
स्वाहा देवहविर्दाने श्रौषड्वौषड्वषट् तथा ॥
तृणता तृणसङ्घे स्यात्तृणता धनुषि स्त्रियाम् ॥

इति भागुरिः.

---

## No. 14364. मालतीमाधवव्याख्या.
## MĀLATĪMĀDHAVAVYĀKHYĀ.

Substance, palm leaf. Size, 13¼ × 1¼ inches. Pages, 28. Lines, 7 on a page. Character, Grantha. Con ition, slightly injured. Appearance, old.

Contains the Acts seven to ten complete.

Same work as that described under R. No. 2691(*b*) of the Triennial Catalogue of Sanskrit Manuscripts, Vol. III, Part I-C.

---

## No. 14365. पत्रसन्देशः.
## PATRASANDĒŚAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 56*a* of the MS. described under No. 13486.

Complete.

A private message purporting to have been written by Raṅganāthacāyra to Śāli (Sādhu) Śēṣayya.

**Beginning:**

सौत्रामण्यास्समज्यायास्सौभाग्येन विजित्वरीम् ।
राजश्रीशालिशेषय्यसभां सम्प्राप्नुतामिदम् ॥
देवः श्रीमाननतनुकृपया स्वेन सृष्टं प्रपञ्चं
रक्षन् स प्रत्युपकृतिधियोपप्लवेभ्यः पितेव ।
स्वेन प्रत्तैर्बहुलकरणैः प्रत्यहं वर्धमानं
पश्यन् पश्यन् मुदितमुदितो मोदयत्वीप्सितैर्वः ॥
अत्रत्यानां सुखमविकलं तत्र भावत्कसौख्यं
पत्रज्ञातं पुनरहरह ज्ञातुमत्युत्सुकाः स्मः ।
लब्धे काले द्रविडवचसां व्याकृतिं शिक्षमाणो
वर्ते युष्मत्प्रहितहृदयः किं तु निष्ठा दुरापा ॥

वैद्यारण्यं मलिनयजुषो भाष्यमाश्वेव सम्य-
ग्बद्धं श्लक्ष्णं सपदि च मयासादितं पञ्चभागम् ।
अन्यान् भागानपि पुनरहं प्राप्तमात्रानतन्द्रो
यौष्माकीनं सद उपनयन्नैव जिह्रेमि तत्त्वम् ॥

*  *  *  *

कृष्णाचार्यः पठति न भृशं ताड्यतेऽतीव नैव
प्रातः प्रातः प्रलघु यजुषो भागमध्येति भूयः ।
सायं क्रीडारसपरवशः क्रीशताद्दश्यमाम्रो-
त्येवं मुक्तो गणनपणनैर्नो जहात्येव मौग्ध्यम् ॥

**End:**

श्रीवैदुष्यप्रदिमविनयप्रौढिवादान्यकाद्यै-
राजन्मोत्थैरखिलहृदयोल्लासकानां प्रभूणाम् ।
शेषय्यानां हृदयसुहृदा रङ्गनाथेन क्लृप्ता
विज्ञप्तिस्स्तात् विविधसुमुदां सिद्धये वृद्धये च ॥

Foll. 56*b* and 57*a* contain the names of certain medicines in the Tamil language.

---

No. **14366**. विष्णुस्तवः, सव्याख्यः.

VIṢṆUSTAVAḤ WITH COMMENTARY.

Pages, 4. Lines, 5 on a page.

Begins on fol. 53*a* of the MS. described under No. 3950.

Incomplete.

A eulogy on God Veṅkaṭeśa, worshipped in Tirupati, and on God Rāma. It is followed by a commentary, the author of which is not given.

**Beginning:**

वेङ्कटाद्रौ च (श्रीवेङ्कटाद्रि)निलयः कमलाकामुकः पुमान् ।
अभङ्गरविभूतिस्ते तरङ्गयतु मङ्गलम् ॥

अस्यार्थः—वेङ्कटाचलवासः वेङ्कटेश्वरः ते मङ्गलं तरङ्गयतु । मङ्गलपरम्परावाप्तिं करोतु । वेङ्कटेशः कीदृश इत्याकाङ्क्षायां यं कामये(ते)त्यादि अन्तृणीसूक्त(?)पर्यालोचनयाप्यतिमाहात्म्यं ज्ञायते। तत्पतेः वेङ्कटेश्वरस्य सर्वोत्तमत्वं सिद्धमेव । स्वयमनवतीर्णः क(थं) परान् तारयिष्यतीति न्यायात् स्वस्यैश्वर्याभावे परेषां दानमसङ्गतमित्युक्तम् । अत एव श्लोके अभङ्गरविभूतिरिति ।

**End:**

स श्रेयांसि बहूनि सन्दिशतु वो वीरः कृपात्मा शुचिः
यन्नेत्रान्तजरक्तिमा समतनोदब्धि शराग्रांस्थितिम् ।
यद्दीक्षा विमतानुजाय सदया लङ्काधिपत्यं ददौ
यत्पादाब्जपरागजालमकरात्पाषाणमेणीदृशम् ॥

*　　*　　*　　*

रघुनायकस्तावदनन्तकल्याणगुणपरिपूर्णः रामः सः श्रेयांसि सन्दिशतु ददात्वित्याशीः ।

---

## No. 14367. अग्निना रयिमिति मन्त्रार्थः.

## AGNINĀ RAYIMITI MANTRĀRTHAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 54*b* of the MS. described under No. 3950.

Complete.

Gives the meaning in Sanskrit of a Mantra beginning with अग्निना occurring in the first Sūkta of the first Aṣṭaka in the first Maṇḍala of the Ṛgvēda.

**Beginning:**

अग्निना रयिमश्नवत्पोषमेव दिवे दिवे ।
यशसं वीरवत्तमम् ॥
तेनैव रयिमाप्नोति वित्तं विद्याधनात्मकम् ।
दिवसे दिवसे नित्यं पुष्टिमेव न हीनताम् ॥

यशश्च पुत्रसंयुतं वीर्यवत्तरमेव च । एतन्मन्त्रप्रतिपाद्यो भगवानस्य यजमानस्य सर्वाभिष्टिं दत्त्वा रक्षत्वित्याशीः ।

**End:**

दिवे दिवे दिवसे दिवसे पोषं पुष्टिं च अश्नुवत् तस्य यशसं वीरवत्तमं कीर्तिमन्तं पराक्रमशालिनं पुत्रं च प्राप्नुव(प्नो)त्वित्यर्थः । एतादृशः अग्निशब्दवाच्यः परमात्मा अस्य यजमानस्य धनकलत्रवस्तुवाहनाद्यष्टैश्वर्यादिकं दत्वा रक्षत्वित्याशीः ॥

---

## No. 14368. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

## NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 56*a* of the MS. described under No. 3950.

Incomplete.
Same work as that described under No. 4223 ante.

---

No. 14369. मुक्तावलीव्याख्या.
MUKTĀVALĪVYĀKHYĀ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 59*a* of the MS. described under No. 3950.

Wants the beginning and the end in the Pratyakṣakhaṇḍa.

A commentary on the Muktāvalī of Viśvanātha Pañcānana, which work has been described under No. 3939 ante.

**Beginning:**

पदार्थाः कतिविधा इत्याकाङ्क्षायामाह—किमितीत्युक्तम् ।

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थास्सप्त कीर्तिताः ॥ इति ॥

अत्र किञ्चिद्विचार्यते—यदुक्तं भवद्भिस्सप्तपदार्थे(र्था इ)ति, तत्तुच्छम्—शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वस्य विद्यमानत्वात् । शक्तेरतिरिक्तपदार्थत्वं सादृश्यस्यातिरिक्तपदार्थत्वं कथमिति चेदित्थम् ; तथाहि—मण्यादिसहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते । तदा मण्यादिना वह्नौ दाहानुकूला शक्तिर्नश्यति ।

**End:**

शब्दविशेषगुणकत्वमाकाशलक्षणम् । अहो आकाशत्वं जातिर्वा उपाधिर्वेति विशये आकाशकालदिशामेकैकव्यक्तिवृत्तित्वादाकाशत्वादिकं न जातिः; किन्तु आकाशत्वं शब्दाश्रयत्वम् । मूले " आकाशस्य तु विज्ञेयश्शब्दो वैशेषिको गुणः " इत्यत्र वैशेषिककथनं तु.

---

No. 14370. एकादशीनिर्णयः, कर्णाटकटीकासहितः.
EKĀDAŚĪNIRṆAYAḤ WITH KANARESE MEANING.

Pages, 4. Lines, 5 on a page.

Begins on fol. 68*a* of the MS. described under No. 3950.

Incomplete.

Deals with the determination of the Ēkādaśī day for the purpose of observing the Vrata on that day. The work contains meaning in Kanarese.

**Beginning:**

व्रतानामेव सर्वेषां सौरेण (हि) विनिर्णयः ।
दशम्यादित्रयाणां तु आर्येण (च) विनिर्णयः ॥
आर्यमानैर्यदा नाड्यः षट्पञ्चाशत्परेऽहनि ।
नो चेत्पूर्वैव दशमी किञ्चिन्न्यूनं परेऽहनि ॥
वेधस्तु द्विविधः प्रोक्तः स्वरूपाच्च ध्रुवांशतः ।
तत्राद्ये न तु सन्देहः द्वितीयस्त्रिविधस्स्मृतः ॥
वेधस्तु पञ्चदशभिः दशभिः पञ्चभिः क्रमात् ।

**End:**

लिप्तिर्विघटिका पञ्च लिप्तयो द्वादशैव तु ।
घटिकैका समुद्दिष्टा ज्योतिश्शास्त्रप्रसिद्धितः ॥

---

No. **14371.** रुद्राक्षधारणविधिः.

RUDRĀKṢADHĀRAṆAVIDHIḤ.

**Pages, 2.** Lines, 11 on a page.

Begins on fol. 176*a* of the MS. described under No. 631.

Complete.

Similar to the work described under No. 5471 ante.

**Beginning:**

अस्य श्रीरुद्राक्षधारणमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, रुद्रो देवता, सकलमन्त्रजपहोमादिसिद्ध्यर्थे रुद्राक्षधारणे विनियोगः ।

पद्मासने समासीनः भस्मस्नायी त्रिपुण्ड्रधृत् ।
तत्तत्स्थाने यथाशास्त्रं कुर्याद्रुद्राक्षधारणम् ॥

ओं नमश्शिवायेति मूलमन्त्रं समुच्चार्य ततः सदाशिवायेति मन्त्रमुच्चार्य शिखायामेकं रुद्राक्षं धारयेत् ।

**End:**

चट चट प्रचट प्रचट कह कह वम वम बन्ध बन्ध घातय घातयाघोरास्त्राय हुं फट् स्वाहा ॥

**Colophon:**

इति रुद्राक्षधारणविधिः ॥

## No. 14372. श्रुतबोधः.
## ŚRUTABŌDHAḤ.

Pages, 7. Lines, 11 on a page.

Begins on fol. 229*a* of the MS. described under No. 631.

Complete.

Same work as that described under No. 1800 ante.

---

## No. 14373. नृसिंहतापिन्युपनिषद्.
## NṚSIṀHATĀPINYUPANIṢAD.

Pages, 80. Lines, 5 on a page.

Begins on fol. 41*a* of the MS. described under No. 8041.

Incomplete in Uttaratāpinī.

Same work as that described under No. 577 ante.

Foll. 81 to 85 contain the names of certain medicines in Tamil language.

---

## No 14374. अष्टाङ्गहृदयव्याख्या—बालप्रबोधिनी.
## AṢṬĀṄGAHṚDAYAVYĀKHYĀ : BĀLAPRABŌDHINĪ.

Substance, palm-leaf. Size, 15¾ × 1⅜ inches. Pages, 161. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Aṣṭāṅgahṛdayavyākhyā (Sarvāṅgasundarī) 82*a*.

Contains the Śārīrakasthāna only complete, but wants the beginning.

A commentary by name Bālaprabōdhinī on the Aṣṭāṅgahṛdaya of Vāgbhaṭa, which work has been described under No. 13072 ante.

**Beginning:**

तद्ध्यस्ते शारीरकेऽपि शरीरान्तरवातानां तत्तद्रस्ति . . . . . . . . नात्र संशयः ।

बीजाभावे यथा न स्युरङ्कुराश्च तथैव हि । कर्माभावे स्वात्मनोऽपि देहाभाव इति . ते । तेन स्वकर्मक्लेशचोदित इत्युक्तम् ।

* * * *

इदानीं प्रधानफलदायि यत्प्रशस्तलक्षणं वपुषस्तद्दर्शयितुमाह—दानेत्यादि । . . सर्वसत्त्वानामात्मभवनं न केवलं पूर्वोक्तं स्वं स्वहस्तत्रयमित्यादि वर्धमानं

शनैः शुभम् । इत्यन्तं यल्लक्षणं तच्छरीरस्यायुर्वृद्धिहेतुः, दानादिको गुणः पुण्यायुर्वृद्धिकृत्, दानं वयश्च यथासम्भवं, केचित्पुण्यकृतः केचित् आयुर्वृद्धिकृतः केचिदुभयकृतश्च ॥

**Colophon:**

इति बालप्रबोधिन्यां टीकायां युक्तनामनि ।
पूर्णस्तृतीयोऽप्यध्यायश्शारीरस्थानगोचरः ॥

इति शारीरके तृतीयोऽध्यायः ॥

अङ्गस्थितत्त्वे सिद्धेऽपि कर्मणा मर्म वक्ष्यते ।
बहुधा वक्तव्यतया पृथगध्यायनिर्णयः ॥

अथात इत्यादि ।

**End:**

गर्भावक्रान्तीयमित्यादिभिश्चतुर्भिरध्यायैः प्रसक्तानुप्रसक्त्या यथोदीरितं मरणं विकृतिविज्ञानीयेन दूतादिविज्ञानीयेन च । ततः शरीरस्य जन्ममरणात्कारणादिदं स्थानं शारीरकमुच्यते । यद्यपि सर्वं स्थानं शरीरमधिकृत्योक्तम्; तथापि इदं स्थानं साक्षाज्जन्ममरणचिन्तनात् शरीरस्य प्राधान्येन शारीरस्थानमुच्यत इति भावः ॥

**Colophon:**

इति बालप्रबोधिन्यां टीकायां युक्तनामनि ।
षष्ठोऽध्यायश्च सम्पूर्णः शारीरस्थानगोचरः ॥

इति ॥

अब्दे प्रामादिके नाम्नि माघे मासि तथैव च ।
श्यामाचार्यस्य पुत्रेण लिखितं पुस्तकं मया ॥

---

No. **14375.** अष्टाङ्गहृदयव्याख्या—सर्वाङ्गसुन्दरी.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ : SARVĀṄGASUNDARĪ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 82*a* of the MS. described under No. 14374.

Contains the first Adhyāya incomplete in the Sūtrasthāna.

Same work as that described under R. No. 37 of the Triennial Catalogue, Vol. I, Part I-A.

No. 14376. अभिषेकमन्त्रः.

ABHIṢĒKAMANTRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 116.

Incomplete.

The Mantras dealing with the ritualistic procedure connected with the bath to be given to the image of God in the course of the ceremonial worship of that image.

**Beginning:**

मित्रोऽसि वरुणोऽसि समहं विश्वैर्देवैः क्षत्रस्य नाभिरसि क्षत्रस्य योनिरासि स्योनामासीद सुषदामासीद मा त्रा(त्वा) हिंसीत् । (मा मा हिंसीत्) निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः । देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भै(र्भै)षज्येन । तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ।

**End:**

परि णो रुद्रस्य हेतिः स्तुहि श्रुतम् । मीढुष्टम हन् । (हस्ते) बिभर्षि । त्वमग्ने रुद्र (आ)गहि राजानम्? ।

---

No. 14377. पञ्चशान्तिः.

PAÑCAŚĀNTIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 116, wherein this work has been omitted to be included in the list of other works.

Complete.

Same work as that described under No. 225 ante.

---

No. 14378. आतुरसन्न्यासविधिः.

ĀTURASANNYĀSAVIDHIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 116.

Complete; as laid down by Āṅgirasa.

Similar to the work described under No. 3542 ante.

**Beginning:**

अथाङ्गिरसोक्तमातुरसन्न्यासविधिं व्याख्यास्यामो व्याध्यादिग्रस्त आतुरो वपनपूर्वकं स्नात्वाचम्य देशकालावनुकीर्त्य । एवङ्गुण ( . . . ) तिथौ समस्तपापक्षयद्वारा ब्रह्मलोकप्राप्त्यर्थमातुरसन्न्यासविधिं करिष्ये ।

**End :**

सच्चिदानन्दरूपोऽहं परिपूर्णोऽस्मि सर्वदा ।
ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ॥

**Colophon :**

इत्याङ्गिरसोक्तातुरसन्यासविधिः ॥

---

## No. 14379. पुरुषसूक्तहोममन्त्रः.
## PURUṢASŪKTAHŌMAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 4*a* of the MS. described under No. 123.

Incomplete.

Deals with a propitiatory fire-offering conducted with the Mantras of the well-known Puruṣasūkta.

**Beginning :**

सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलं स्वाहा । पुरुष एवेदं सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति स्वाहा ।

**End :**

नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत । पद्भ्यां भू . . . . .

---

## No. 14380. रुद्रहोमः.
## RUDRAHŌMAḤ.

Pages, 6. Lines, 10 on a page.

Begins on fol. 5*a* of the MS. described under No. 123.

Deals with a propitiatory fire-offering using 170 Mantra-formulae taken from the Rudrādhyāya which is the fifth Prasna of the fourth Kāṇḍa of the Kṛṣṇa-Yajurvēda.

**Beginning :**

नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः स्वाहा । (1)

या त इषुश्शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय स्वाहा । (2)

**End :**

तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि स्वाहा ॥ 170 ॥

## No. 14381. अपामार्गहोमविधिः, आन्ध्रटीकासहितः.
## APĀMĀRGAHŌMAVIDHIḤ WITH TELUGU MEANING.

Pages, 3. Lines, 10 on a page.

Begins on fol. *55b* of the MS. described under No. 123.

Complete.

Deals with a propitiatory fire-offering conducted with the sticks of Apāmārga plant. The work contains meaning in Telugu.

**Beginning:**

कन्यार्थी लभते कन्यां हुत्वा लाजान् घृताप्लुतान् ।
अपामार्गसमिद्धोमैरलक्ष्मीं नाशयेद्बुधः ॥
सर्वकल्मषनाशाय जुहुयाच्च घृताहुतीः ।
ब्राह्मणादीन् वशे सर्वान् हुत्वा खदिरसंभवान् ॥
सितरक्तैर्नीलपीतैस्सूत्रैस्संवेष्टितान् क्रमात् ।
अ(ल)क्षं हुत्वा घृतात्सर्वान् कामानाप्नोति साधकः ॥

**End:**

यस्तु मन्त्रं जपेन्नित्यं प्रातस्स्नात्वा सहस्रकम् ।
श्रीरारोग्यं च तेजश्च वर्धयेत्तस्य सर्वदा ॥
संवत्सरं जपेद्यस्तु क्षीराहारो जितेन्द्रियः ।
अर्चनं च यथाशक्ति कुर्वन्नयुतमन्वहम् ॥

* * * *

किं तस्य मानुषैर्भोगैः प्रसन्ने च जगत्पतौ ।
बहुना किमिहोक्तेन तच्चित्तस्तत्परायणः ॥

Foll. 55 and *56a* contain the Telugu meaning of the above Hōma. Foll. 57 and 58 contain a portion of Namaka with Telugu meaning.

---

## No. 14382. कलिसन्तारणोपनिषत्.
## KALISANTĀRAṆŌPANIṢAD.

Pages, 2. Lines, 5 on a page.

Begins on fol. *66a* of the MS. described under No. 505, wherein this work has been omitted to be included in the list of other works.

Complete.

Same work as that described under No. 351 ante, but with a different Śānti in the beginning and end.

## No. 14383. तैत्तिरीयोपनिषद्भाष्यम्.
## TAITTIRĪYŌPANIṢADBHĀṢYAM.

Pages, 136. Lines, 5 on a page.

Begins on fol. 8*a* of the MS. described under No. 7859.

Complete.

By Sāyaṇācārya. Same work as that described under No 512 ante.

The scribe adds—

चित्रभानुहायनमाघमासे शुक्ले तु पूर्णिमा ।
वेङ्कटः कृष्णतनयःसीतारामस्य सूरिणा ? ॥
चतुःषष्ठ्यनुवाकानां व्याख्यानं लिखितं मया ।

Fol. 69*a* contains a portion of Śrīsūkta.

---

## No. 14384. नारायणोपनिषत्.
## NĀRĀYAṆŌPANIṢAD.

Pages, 2. Lines, 7 on a page.

Begins on fol. 81*a* of the MS. described under No. 2881.

Complete.

Same work as that described under No. 561 ante.

---

## No. 14385. अथर्वशिरउपनिषत्.
## ATHARVAŚIRA-UPANIṢAD.

Pages, 4. Lines, 7 on a page.

Begins on fol. 81*b* of the MS. described under No. 561.

Complete.

Same work as that described under No. 257 ante.

---

## No 14386. आश्वलायनश्रौतसूत्रम्.
## ĀŚVALĀYANAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 86. Lines, 5 on a page. Character, Telugu and Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Taittirīyayajussaṁhitā 44*a*, Vēdalakṣaṇa 49*a*, Aparaviṣaya 55*a*.

Contains from the end of the 2nd Kaṇḍikā of the 7th Adhyāya to the end of the 12th Kaṇḍikā of the 12th Adhyāya.

Same work as that described under No. 1029 ante.

No. 14387. तैत्तिरीययजुस्संहिता.

TAITTIRĪYAYAJUSSAṀHITĀ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 44*a* of the MS. described under the previous number.

Contains a few portions of the fifth Praśna of the sixth Kāṇḍa and the whole of third and fourth Praśnas of the seventh Kāṇḍa.

Same work as that described under Nos. 71 and 72 ante.

---

No. 14388. ऋग्वेदलक्षणम्.

ṚGVĒDALAKṢAṆAM.

Pages, 12. Lines, 5 on a page.

Begins on fol. 49 of the MS. described under No. 14386.

Wants the beginning and the end.

Similar to the work described under R. No. 291 of the Triennial Catalogue of MSS., Vol. I, Part A.

**Beginning:**

ति पञ्चदश वी(नी)चाः । परेण श्वघ्नी परिपन्थि(न्थी)पत्नी(त्नी) प्रजनती रथीं(थि)यन्ति(न्ती) रश्मिणी(नी) काराधुनी अश्वी अङ्गी पितुमती वाजिनी वर्मिणी जारिणी पूर्वी पुष्करिणी सुदृशी वपुषी महिषी चैवाष्टादश । संहिते-त्वीकारदीर्घेषु अधियदस्मिन्नुवर्जम् ।

**End:**

विचक्रचमसं पुरुकुत्सानीहवां स्त्रियो हि दासो न हिं ते पूर्तमिन्द्र तुभ्य-मुपब्रह्माणि शृणवः परि . . . . . . पणीनाम्.

---

No. 14389. अपरविषयः.

APARAVIṢAYAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 55*a* of the MS. described under No. 14386.

Wants the beginning and the end.

The portion herein deals with the procedure relating to the performance of funeral ceremonies in regard to those who maintained the sacred fire as well as to those who did not do so.

**Beginning:**

तथाचोक्तम्—

वक्ष्ये ह्युत्पत्तिमात्राग्निमात्मन्यारोप्य चेन्मृतम् ।
प्रेतस्य दक्षिणं पाणिं कौकिकाग्नौ निधाय हि ॥

उपावरोह जातवेद इमं त इति मन्त्रतः ।
अग्निराहित एवासीत्ततस्तेनाखिलं चरेत् ॥
यदि साग्निः पिता दूरेऽनग्निर्माता गृहे मृता ।
यद्वा साग्निर्गृहे माता पिता देशान्तरे मृतः ॥

**End:**

पश्चाद्वा दर्भान् संस्तीर्य दक्षिणपार्श्वेकैकशः पात्राणि प्रयुनक्ति । स्रुवमाज्यस्थालीं प्रोक्षणपात्रति . . . . हस्तपादाङ्गुष्ठयोः शुक्लसूत्रेणाच्छित्वा द.

---

No. 14390. बोप्पनभट्टीयम्.
BOPPAṆABHAṬṬĪYAM.

Pages, 30. Lines, 8 on a page.

Begins on fol. 83*a* of the MS. described under No. 23.
Complete in 19 Khaṇḍas.
Similar to the work described under No. 14210 ante.
The work is attributed to Boppaṇabhaṭṭa.

**Beginning:**

अथ गार्ह्याणि कर्माण्युदगयनपूर्वपक्षाहःपुण्या(हे)षु कार्याणि यज्ञोपवीती प्रदक्षिणं दक्षिणाङ्गाचारं कुर्यात्पुरस्तादुदग्वोपक्रमापवर्गौ पित्र्याण्यपरपक्षे प्राचीनावीती प्रसव्यं दक्षिणतोपवर्गौ निमित्तानन्तरं नैमित्तिकानि । नामान्नचौळोपनयनगोदानविवाहस्नानसीमन्तपुंसवनेषु पूर्वेद्युर्नान्दीश्राद्धं कुर्यात् ।

**End:**

पार्वणवदग्निमुखान्ते एतेभ्यो हुत्वा चरुणा स्रुचं पूरयित्वाचम्योदनपिण्डं संमृज्य परमेष्ठ्यासि परमां माश्रियं गमयेत्यनेनागारस्तूप उद्विध्येत् । ?

**Colophon:**

इति बोप्पनभट्टीयं खण्डं समाप्तम् ।

---

No. 14391. अङ्कुरार्पणप्रयोगः.
AṄKURĀRPAṆAPRAYŌGAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 98*a* of the MS. described under No. 23.
Complete.
Similar to the work described under No. 2517 ante.

**Beginning:**

अथातोऽङ्कुरार्पणम् । कन्याराशौ पुण्याहं वाचयित्वा । विवाहाङ्गभूतमङ्कुरार्पणं करिष्य इति सङ्कल्प्य । पञ्चपालिका आदाय ।

मध्ये चतुर्मुखं पूर्वे वज्रिणं दक्षिणे यमम् ।

पश्चिमे वरुणमुत्तरे शशिनमेवं पालिकास्थापनं कृत्वा, वल्मीकमृत्तिकां भूमिर्भूम्नेत्यनुवाकेनावेक्ष्य, मा वो रिषदिति खनित्वा, मृत्तिके हन मे पापमिति जपित्वा ।

**End:**

दिशां पतीन् नमस्यामि सर्वकामफलप्रदान् ।
कुर्वन्तु सफलं कर्म कुर्वन्तु सततं शुभम् ॥

इति प्रार्थ्य, नमस्कुर्यात्, शोभनान्ते वेदिकाचतुष्कोणेषु एकैकदेवता गृहदेवतासमीपे निक्षिपेदित्याह भगवान् बोधायनः ।

---

## No. 14392. श्राद्धविधिः.
## ŚRĀDDHAVIDHIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 99*a* of the MS. described under No. 23.

Complete.

Similar to the work described under No. 3819 ante.

**Beginning:**

अपरपक्षे श्राद्धं कुर्वीत, ऊर्ध्वं वा चतुर्थ्या यदहस्संपद्येत तदहः ब्राह्मणानामन्त्र्य, पूर्वेद्युर्वा, स्नातकानेके . यतीन् गृहस्थान् साधून्वा श्रोत्रियान् वृद्धाननवद्यान् स्वकर्मस्थानभावे ।

* * * *

सर्वान्वासनेषु कुशानास्तीर्य विश्वान्देवानावाहयिष्ये इति पृच्छत्यावाहयेत्यनुज्ञातो विश्वे देवासआगतेत्यनयावाह्यावकीर्य विश्वे देवा शृणुतेममिति जपित्वा, पितॄनावाहयिष्ये इति पृच्छति ।

**End:**

विश्वे देवाः प्रीयन्तामिति दैवे वाचयित्वा, वाजेवाज इति विसृज्या मा वाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्योपविशेत् ।

## No. 14393. आपस्तम्बसूत्रवृत्तिः—सूत्रदीपिका.
## ĀPASTAMBASŪTRAVṚTTIḤ: SŪTRADĪPIKĀ.

**Pages, 16. Lines, 5 on a page.**

Begins on fol. 101*a* of the MS. described under No. 23.

Contains the third Paṭala of the first Praśna.

Same work as that described under R. No. 375(*b*) of the Triennial Catalogue of MSS., Vol I, Part I-B.

---

## No. 14394. बोधायनगृह्यशेषसूत्रम्.
## BŌDHĀYANAGṚHYAŚĒṢASŪTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 108*b* of the MS. described under No. 23.

Contains 10th and 12th Adhyāyas of the fourth Praśna.

Similar to the work described under No. 1175 ante.

The portion contained herein deals with the sanctification of the fire for performing offerings in it by a person with his second wife when the first wife is living.

**Beginning:**

अथ गृहस्थस्य(स्तु) द्वे भार्ये विन्देत कथं तत्र कुर्यादिति यस्मिन् काले विन्देतोभावग्निं परिचरेदपराग्निमुपसमाधाय परिस्तीर्याज्यं विलाप्योत्पूय स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वारब्धायां यजमानो जुहोति, नमस्तर्षे गद, अव्यथायै त्वा स्वधायै त्वा ।

**End:**

अग्नौ विवाहस्स हि साधारणो भवति न तत्र विभाग एकत्वादग्नेरित्याह भगवान् बोधायनः ॥

---

## No. 14395. द्विभार्याग्निविभागः, प्रयोगसहितः.
## DVIBHĀRYĀGNIVIBHĀGAḤ WITH PRAYŌGA.

**Pages, 15. Lines, 5 on a page.**

Begins on fol. 110*a* of the MS. described under No. 23.

Complete.

